विशेषः । पचाद्यचि [A]जृम्भः । जृम्भा । [B]जृम्भितम् ।

(618) "जॄ वयोहानौ" (IX-क्र्यादिः-1494. अक. सेट्. पर.)

प्वादिः, ल्वादिश्च ।

'जृणाति जीर्यति जरत्येकार्थे जारयत्यपि ।' (श्लो. 39) इति देवः ।
दिवादौ 'जॄष् वयोहानौ', क्र्यादौ चुरादौ च 'जॄ वयोहानौ' इति समानार्थास्त्रयो धातवः पठ्यन्ते । त्रयोऽप्येते प्रामाणिका इति प्रतिभाति । अत एव, देवश्लोके (39) त्रयाणामनुवादः सङ्गच्छते । मैत्रेयरक्षितक्षीरस्वामिनावपि एवमभ्युपगमेऽनुकूलौ । अत एव सिद्धान्तकौमुद्याम्, 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादिः) इत्यत्र, 'षित्त्वनिर्देशाज्जीर्यतेर्ग्रहणम्, जृणातेस्तु जारयति' इत्युक्तं सङ्गच्छते । एवमभ्युपगमे 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' (परिभाषा-82) इति वचनेन, 'जॄस्तम्भु—' (3-1-58) इत्यादिषु जीर्यतेरग्रहणं स्यादिति तु न शङ्क्यम् । 'ज्ञापकसिद्धं न सर्वत्र' (परिभाषा-126) इति न्यायेन तस्यापि ग्रहणसिद्धेः । षितो जीर्यतेः जरकः, जरयन्, जरा, जरीत्वा-जरित्वा, जरम् २-जारम् २, इत्यादीनि रूपाणि भवन्ति । जृणातेस्तु जारकः, जारयन्, जीर्णिः, जरीत्वा-जरित्वा, जारम् २, इत्यादीनि रूपाणि भवन्ति, इति विशेषः । चौरादिकस्य जारयतेराधृषीयत्वेन, णिजभावपक्षे क्रैयादिकधातुवत् सर्वाण्यपि रूपाणि भवन्ति । शतरि तु जरन् इति विशेषः । माधवीयधातुवृत्तौ तु, भाष्यवार्तिकवृत्तिन्यासपदमञ्जर्यादिपर्यालोचनायां जृणातेः पाठोऽप्रामाणिक इत्युक्तम् । तदुपष्टम्भकवृत्तिन्यासादिग्रन्थस्यानुपलम्भेन सुधियस्तत्त्वमत्र निर्णयन्तु । 'दारजारौ कर्तरि, णिलुक् च' (वा. 3-3-20) इत्यत्रोद्योते 'ननु जृणातिरपि क्र्यादौ पठ्यते ; अत एव तद्व्यावृत्तये 'जनीजॄष्—' (ग. सू. भ्वादौ) इत्यत्र षकारोच्चारणम् । एवञ्च तस्यामित्त्वेन तस्माद् घञि णिलोपेनापि सिद्धे जारयतीति चेन्न—मितो जर इति रूपव्यावृत्त्यर्थत्वात् ।' इति नागेशोपाध्यायानामुक्तिः जृणातेरभ्युपगमेऽनुकूला दृश्यते ।

---

A: 'अस्कम्भिताः प्राप्य शिशून् सजम्भनानुज्जृम्भहर्षा लिलिहुः सशलभनम् ॥' धा. का. 1-50.

B. 'उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयःकृतेन किम् ।' नैषधे 1-48.